पठि:, स्त्री, (पठ् + "सर्व्वधातुभ्य इन् ।" उणां । ४ । ११७ । इति इन् ।) पठनम् । पाठ: । इति शब्दरत्नावली ॥

पठित:, त्रि, (पठ् + क्त ।) वाचित: । कृतपाठ: । अधीत: । उच्चरित: । यथा, हास्यार्णवे ।
"मया न पठिता चण्डी त्वया नापि चिकित्सितम् ।
अकस्मान्नगरोपान्ते कथं धूमायते चिता ॥"

पठितव्यं, त्रि, (पठ् + "तव्यत्तव्यानीयर: ।" ३ । १ । ९६ । इति तव्य ।) पठनीयम् । पाठ्यम् । यथा, मार्कण्डेये देवीमाहात्म्ये । ९२ । ६ ।
"तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितै: ॥"

पड, इ क संहतौ । इति कविकल्पद्रुम: ॥ (चुरां-परं-सकं-सेट् । इदित् ।) इ क, पण्डयति । संहती राशीकरणम् । इति दुर्गादास: ॥

पड, इ ङ गत्याम् । इति कविकल्पद्रुम: ॥ (भ्वां-आत्मं-सकं-सेट् । इदित् ।) इ, पण्ड्यते । ङ, पण्डते । इति दुर्गादास: ॥

पण, ङ व्यवहृतौ । स्तुतौ । इति कविकल्पद्रुम: ॥ (भ्वां-आत्मं-सकं-सेट् ।) व्यवहृतौ व्यवहारे । ङ, पणते । पणायति पणायते आयान्तत्वादुभयपदमिति वोपदेव: । प्राणानामपणिष्टासौ अत्र कर्म्मणि षष्ठी । स्तुतौ तु पणायति पणायते विष्णुं धीर: । अरे तु द्वयोरर्थयोरेव आयस्याप्राप्तिपक्षे आत्मनेपदमेव । अपणिष्ट पेणे पणिता पणिषीष्ट पणिष्यते अपणिष्यत् । इति दुर्गादास: ॥

पण:, पुं, (पण्यतेऽनेन । पण व्यवहारे + "नित्यं पण: परिमाणे ।" ३ । ३ । ६६ । इति अप् ।) कार्षिकताम्रिक: । स तु पञ्चगण्डमाषकारब्धताम्रकर्षकृतव्यवहारद्रव्यम् । पूर्व्वं हि ताम्ररक्तिकाया: कपर्द्दक एको मूल्यमिति अशीतिवराटमूल्य: । लोके तूपचारात् कार्षापणवत् पणव्यपदेशो मूल्य एव । निर्व्वेश: । भृति: । (पणो ग्लहोऽस्त्यस्मिन् । पण + "अर्श आदिभ्यो ऽच् ।" ५ । २ । १२७ । इत्यच् ।) द्यूतम् । ग्लह: । बाड् इति होड् इति वाजि इति च भाषा । (यथा, आर्य्यासप्तशती । ३५४ ।
"प्रतिभू: शुको विपक्षे दण्ड: शृङ्गारसंकथां गुरुषु ।
पुरुषायितं पणस्तद्वाले परिभाव्यतां दाय: ॥"
पण्यते व्यवह्रियते इति । "पुंसि संज्ञायां घ: प्रायेण ।" ३ । ३ । ११८ । इति घ: ।) मूल्यम् । धनम् । इत्यमरभरतौ ॥ कार्षापण: । (यथा, मनु: । ८ । २२४ ।
"यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ।
तस्य कुर्य्यान्नृपो दण्डं स्वयं षण्णवतिं पणान् ॥") क्रय्यशाकादिका । व्यवहार: । इति मेदिनी ॥ त्रिंशतिगण्डक: । इति हेमचन्द्र: ॥ शौण्डिक: । इति जटाधर: ॥ गृहम् । इति शब्दमाला ॥ (पणते अधिकारिभेदेन सुखभोगादिकं व्यवहरति साधकस्य सुकृत्यनुसारेण वैकुण्ठवासादिफलं प्रददातीत्यर्थ: । पचाद्यच् । यद्वा, पण्यते स्तूयते य: । पण स्तुतौ "पुंसीति संज्ञायां घ: प्रायेण ।" ३ । ३ । ११८ । इति घ: । विष्णु: । यथा, महाभारते । १३ । १४९ । ११५ ।
"ऊर्द्ध्वग: सत्पथाचार: प्राणद: प्रणव: पण: ॥")

पणग्रन्थि:, पुं, (पणस्य विक्रयादेर्ग्रन्थिर्यत्र ।) हट्ट: । इति शब्दरत्नावली ॥

पणनं, क्ली, (पण व्यवहारे + भावे ल्युट् ।) विक्रय: । इति शब्दरत्नावली ॥

पणफरं, क्ली, लग्नात् द्वितीयपञ्चमाष्टमैकादशलग्ना: । यथा, ज्योतिस्तत्त्वे ।
"पणफरं द्वितीयाष्टपञ्चमैकादशं विदु: ॥"

पणव:, पुं, (पणं स्तुतिं वातीति । पण + वा + क: ।) गायनपटह: । (यथा, गीतायाम् । १ । १३ ।
"तत: शङ्खाश्च भेर्य्यश्च पणवानकगोमुखा: ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥")
प्रणव इति केचित् । इत्यमरभरतौ ॥

पणवा, स्त्री, (पणव + टाप् ।) पणव: । यथा —
"पणव: पणवा च स्यात् प्रणवोऽप्यत्र वर्त्तते ॥"
इति भरतद्विरूपकोष: ॥

पणस:, पुं, (पणायते इति । पण + "अत्यविचमीति ।" उणां । ३ । ११७ । इति असच् ।) पण्यद्रव्यम् । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥

पणाङ्गना, स्त्री, (पणेन धनेन लभ्या अङ्गना । धनेन वश्यत्वात् तथात्वम् ।) वेश्या । इति हेमचन्द्र: ॥

पणाया, स्त्री, (पणाय्यते व्यवह्रियते इति । पण व्यवहारे स्तुतौ च + स्वार्थे आय + ततो भावे अप् । ततष्टाप् ।) क्रयविक्रयव्यवहार: । इति जटाधर: ॥ (स्तुति: । द्यूतम् । इति धात्वर्थलब्धोऽर्थ: ॥)

पणायित:, त्रि, (पणाय्यते स्म इति । पण व्यवहारे स्तुतौ च । "आयादय आर्द्धधातुके वा ।" ३ । १ । ३१ । इति स्वार्थे आयस्तत: क्त: ।) स्तुत: । इत्यमर: । ३ । २ । १०९ ॥ (व्यवहृतम् । क्रीतम् । विक्रीतम् । इति धात्वर्थलब्धोऽर्थ: ॥)

पणास्थि, क्ली, (पणस्य पणाय वा यदस्थि ।) कपर्द्दकम् । वराटक: । इति त्रिकाण्डशेष: ॥

पणास्थिकं, क्ली, (पणास्थि + स्वार्थे कन् ।) वराटक: । इति हेमचन्द्र: ॥

पणितं, त्रि, (पण्यते स्म इति । पण + क्त । अयाभावपक्षे सिद्धम् ।) स्तुतम् । इत्यमर: ।३।२।१०९॥ व्यवहृतम् । इति पणधात्वर्थदर्शनात् ॥ (ग्लहे, क्ली । वाजि इति भाषा । यथा, महाभारते १ । सौपर्णे । २२ । ४ ।
"ततस्ते पणितं कृत्वा भगिन्यौ द्विजसत्तम ! ।
जग्मतु: परया प्रीत्या परं पारं महोदधे: ॥")

पणितव्यं, त्रि, (पण्यते इति । पण ङ व्यवहारे स्तुतौ च । "तव्यत्तव्यानीयर: ।" ३ । १ । ९६ । इति तव्य ।) विक्रेयद्रव्यम् । इत्यमर: । २ । ९ । ८२ ॥ स्तोतव्यम् । व्यवहार्य्यम् । इति पणधात्वर्थदर्शनात् ॥

पण्ड:, पुं, (पण्डते निष्फलत्वं प्राप्नोतीति । पडि गतौ + पचाद्यच् । यद्वा पण ङ व्यवहारे । "अमन्तात् ड: ।" उणां । १ । ११३ । इति ड: ।) क्लीवम् । नपुंसकम् । इत्यमर: । २ । ६ । ३९ ॥ निष्फले, त्रि. ॥

पण्डा, स्त्री, (पण ङ व्यवहारे । "अमन्तात् ड: ।" उणां । १ । ११३ । इति ड: । ततष्टाप् ।) बुद्धि: । इति मेदिनी ॥ तत्त्वानुगा बुद्धि: । इति हेमचन्द्र: ॥

पण्डापूर्व्वं, क्ली, (पण्डं निष्फलं अपूर्व्वं अदृष्टम् ।) फलाजनकादृष्टम् । तद्विशिष्टे त्रि । यथा, "यदपि पण्डापूर्व्वं फलमिति तदपि न कामनाभावे अकरणापत्तेस्तौल्यात् ।" इति सिद्धान्तमुक्तावली ॥

पण्डित:, पुं, (पण्डा वेदोज्ज्वला तत्त्वविषयिणी वा बुद्धि: । सा जाता अस्य । "तदस्य संजातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् । यद्वा, पण्डते तत्त्वज्ञानं प्राप्यतेऽस्मात् । गत्यर्थेति क्त: ।) शास्त्रज्ञ: । अस्य लक्षणं यथा,—
("निषेवते प्रशस्तानि निन्दितानि न सेवते ।
अ-नास्तिक: श्रद्दधान एतत् पण्डितलक्षणम् ॥"
इति चिन्तामणि: ॥)
"पठका: पाठकाश्चैव ये चान्य शास्त्रचिन्तका: ।
सर्व्वे व्यसनिनो मूर्खा य: क्रियावान् स पण्डित: ॥"
इति महाभारते वनपर्व्व ॥
अपि च श्रीभगवद्गीतायाम् । ५ । १७ ।
"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिता: समदर्शिन: ॥"
तत्पर्य्याय: । विद्वान् २ विपश्चित् ३ दोषज्ञ: ४ सन् ५ सुधी: ६ कोविद: ७ बुध: ८ धीर: ९ मनीषी १० ज्ञ: ११ प्राज्ञ: १२ संख्यावान् १३ कवि: १४ धीमान् १५ सूरि: १६ कृती १७ कृष्टि: १८ लब्धवर्ण: १९ विचक्षण: २० दूरदर्शी २१ दीर्घदर्शी २२ । इत्यमर: । २ । ७ । ५-६ ॥ विशारद: २३ । कवी २४ सूरी २५ । इति भरत: ॥ विदग्ध: २६ दूरदृक् २७ वेदी २८ वृद्ध: २९ बुद्ध: ३० विधानग: ३१ प्रज्ञिल: ३२ कृषि: ३३ । इति शब्दरत्नावली ॥ विज्ञ: ३४ मेधावी ३५ । इति राजनिर्घण्ट: ॥ सिह्लक: । इति मेदिनी ॥ (सर्व्वज्ञत्वात् महादेव: । यथा, महाभारते । १३ । १७ । १२४ ।
"न्यायनिर्व्वपण: पाद: पण्डितो ह्यचलोपम: ॥")

पण्डितम्मन्य:, त्रि, (आत्मानं पण्डितम्मन्यते य: स: । "आत्ममाने खश्च ।" ३ । २ । ८३ । इति खश् ।) पण्डिताभिमानी । इति व्याकरणम् ॥

पण्डितमानी, [न्] त्रि, (आत्मानं पण्डितं मन्यते इति । मन + णिनि: ।) पण्डिताभिमानी । यथा "मूर्खा: पण्डितमानिन: ।" इति प्राचीना: ॥

पण्यं, त्रि, (पण्यते इति । पण ङ व्यवहारे स्तुतौ च । "अवद्यपण्यवर्य्यागर्ह्येति ।" ३ । १ । १०१ । निपातनात् साधु ।) पणितव्यम् । विक्रेयद्रव्यम् । इत्यमर: । २ । ९ । ८२ । (यथा, रामायणे । २ । ४८ । ४ ।
"न चाहृष्यन् न चामोदन् वणिजो न प्रसारयन् ।